COMPILED AND CIRCULATED BY PROF. ASIS BHATTACHARYA
DEPARTMENT OF SANSKRIT, NARAJOLE RAJ COLLEGE

# सिद्धान्तकौमुदी :तिङन्तप्रकरणम्

## सूत्र- शेषात् कर्तरि परस्मैपदम् १।३।७८

आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि परस्मैपदं स्यात् ॥

पूर्वेण प्रकरणेन आत्मनेपदनियमः कृतः, न प्रस्मैपदनियमः। तत् सर्वतः प्राप्नोति, तदर्थम् इदम् उच्यते। येभ्यो धातुभ्यो येन विशेषणेन आत्मनेपदम् उक्तं ततो यदन्यत् स शेषः। शेषात् कर्तरि परस्मैपदं भवति। शेषादेव न अन्यस्मात्। अनुदात्तङित आत्मनेपदम् उक्तम् अस्ते। शेते। ततो ऽन्यत्र परस्मैपदम् भवति याति। वाति। नेर्विशः आत्मनेपदम् उक्तम् निविशते। ततो ऽन्यत्र परस्मैपदम् आविशति। प्रविशति। कर्तरि इति किम्? पच्यते। गम्यते। कर्मकर्तरि कस्मात् परस्मैपदं न भवति, पच्यते ओदनः स्वयम् एव? कर्तरि कर्मव्यतिहारे १।३।१४ इति द्वितीयं कर्तृग्रहणम् अनुवर्तते, तेन कर्ताएव यः कर्ता तत्र प्रस्मैपदम् भवति, कर्मकर्तरि न भवति।

आत्मनेपद निमित्त हीनाद्धातोः कर्तरि परस्मैपदं स्यात्॥

पूर्वेण" इति। "अनुदात्तहितः" १।३।१२ इत्यादिना। "सर्वत्र प्राप्नोति" इति। अशेषेभ्योऽपि। "तदर्थमिदमुच्यते" इति। सर्वत्र परस्मैपदे प्रसक्ते तन्निवृत्त्यर्थम्; अर्थशब्दस्य निवृत्तिवचनत्वात्। तथा-मशकार्थो धूम इति। तदेनैतत् नियमार्थमित्युक्तं भवति। "येभ्यो धातुभ्यः" इत्यादिना शेषत्वं दर्शयति। "येन विशेषणेन"इति।अनुबन्धादिना।"याति,वाति"इत्यनुबन्धशेषस्योदाहरणम्।"आविशति,प्रविशति"इत्युपसर्गशेषस्यार्थशेष-स्यापि।एवंगन्धनादिभ्योऽन्यत्र करोतीत्येवमादिकमुदाहरणं वेदितव्यम्। ननु च शेषादित्यनेन पञ्चम्यन्तेन धातुसमानाधिकरणेन धातुरेव विशिष्यते,नार्थः,ततश्चाशेषेषुगन्धनादिष्वर्थेषुपरस्मैपदंप्राप्नोति,नैतदस्ति;गन्धनादयोहि प्रकृतेरेवार्थाः, तत्रासौ शेषग्रहणान्निवत्र्तमानस्तानपि निवत्र्तयति। "पच्यते, गम्यते" इति। ननु च यद्यत्र परस्मैपदं स्यात्, तदा "भावकर्मणोः" १।३।१३ इति

वचनमनर्थकं स्यात्, अनवकाशत्वात्, नैतदस्ति; अस्ति हि तस्यावकाशः। कः पुनरसौ? यो न शेषः-- आस्यते, शय्यते, क्रियत इति। अनुदात्तेत्वं ङित्त्वञ्चाशेषः। "शेषात् कर्तरि" १।३।७८ इत्यत्र कर्त्तृग्रहणं सामान्यमुपात्तमिति यो देशयेत् तं प्रत्याह--"कर्मकर्त्तरि" इत्यादि। "कर्त्तरि कर्मव्यतीहारे" १।३।१४ इत्यादिना परिहरति। "कर्त्तैव यः कर्त्ता" इति। शुद्धो यः कर्त्ता, कर्त्तृवद्भावरहितो यः कर्त्तैत्यर्थः॥
"अनुदात्तङित" इति "स्वरितञित" इति चोक्तादात्मनेपदविषयादन्यः शेषः। तदाह--आत्मनेपदनिमित्तहीनादिति। अनेन भूधातोः कर्तरि लस्य परस्मैपदं सिद्धम्। तत्र तिबादिनवके युगपत्पर्यायेण एकद्वित्रादिकतिपयरूपेण वा प्राप्ते "युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः" "अस्मद्युत्तमः" "शेषे प्रथमः" इति व्यवस्थां वक्ष्यन् प्रथमादिसंज्ञां तावदाह--तिङस्त्रीणि त्रीणि।
इतः अग्रे आतृतीयाध्यायपरिसमाप्तेः (३।४।११७) वक्ष्यमाणानि कार्याणि लकारस्य एव स्थाने भवन्ति इति अधिकारः वेदितव्यः। लस्य इति सामान्यस्य निर्देशस्तेन लकारमात्रस्य ग्रहणं भवति। लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लुङ्, लृङ् इत्येतेषां दशलकाराणाम्।

## सूत्र- लस्य ३।४।७७

अधिकारोऽयम् ॥
लस्य इत्ययम् अधिकारः। अकार उच्चारनार्थः। लकारमात्रं स्थानित्वेन अधिक्रियते। यदिति ऊर्ध्वम् अनुक्रमिष्यामः लस्य इत्येवं तद् वेदितव्यम्। किं च इदं लस्य इति? दश लकारा अनुबन्धविशिष्टा विहिता अर्थविशेषे कालविशेषे च। तेषां विशेषकराननुबन्धानुत्सृज्य यत् सामान्यं तद् गृहयते। षट् टितः, चत्वारः ङितः। अक्षरसमाम्नायवदानुपूर्व्या कथ्यन्ते। लट्। लिट्। लुट्। लृट्। लेट्। लोट्। लङ्। लिङ्।

लुङ्। लृङ्। इति। अथ लकारमात्रस्य ग्रहणम् कस्मान् न भवति, लुनाति, चूडालः इति? धात्वधिकारोऽनुवर्तते, कर्त्रादयश्च विशेषकाः।

"धातो"रित्यधिकृतम्। अकारो न विवक्षितः। तेन लिडादीनामपि सङ्ग्रहः। "चूडाल" इत्यादौ च नातिप्रसङ्गः।

वणग्रहणे प्रत्ययग्रहमपरिभाषा, अर्थवद्ग्रहणपरिभाषा च न प्रवर्तते इति लुनाति, चूडाल इत्यादौ तिबाद्यादेशः कुतो न भवतीति चेत्?। अत्राहुः--- "लः कर्मणी"ति सूत्रे निर्दिष्टानां कत्र्राद्यर्थानामनुवृत्तेः कत्र्राद्यर्थे विहितस्य लकारस्य ग्रहणमिति। अतोऽपि तिबाद्यादेशानुवादेन कत्र्राद्यर्थ विधिरिति कल्पना निरस्ता। लस्थानिकतिबादीनांकत्र्राद्यर्थर्थेविहितस्यलस्य तिबादिविधानमित्यन्योन्याश्रयापत्तेः। द्वा धातोरित्यधिकाराद्धातोर्विहितस्यैव लस्येह ग्रहणमिति नोक्ताऽतिप्रसङ्गः। लस्येत्संज्ञा तु न भवति, फलाऽभावात्। न च लित्स्वरः फलं, णलो लित्त्वेन तदभावस्यज्ञापनात्।नाप्यश्रवणमेवफलं,तदुच्चारणस्यानर्थक्यापत्तेः,आदेशविधिनैवाऽश्र वणलाभाच्च। लसय् तिबादिस्थानित्वाभ्युपगमे तु "लः परस्मैपद"मित्यादि स्वरसतः सङ्गच्छत इति दिक्।

---